श्री सायि सहस्रनाम स्तोत्रं

ध्यानं –

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं |
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
सायीनाथं त्रिगुणरहितं सद्गुरुं तं नमामि || [भावातीतं]

स्तोत्रं –

अखंडसच्चिदानंदश्चाऽखिलजीववत्सलः |
अखिलवस्तुविस्तारश्चाऽक्बराज्ञाभिवंदितः || 1 ||

अखिलचेतनाऽऽविष्टश्चाऽखिलवेदसंप्रदः |
अखिलांडेशरूपोऽपि पिंडे पिंडे प्रतिष्ठितः || 2 ||

अग्रणीरग्र्यभूमा च अगणितगुणस्तथा |
अघौघसन्निवर्ती च अचिंत्यमहिमाऽचलः || 3 ||

अच्युतश्च तथाजश्च अजातशत्रुरेव च |
अज्ञानतिमिरांधानां चक्षुरुन्मीलनक्षमः || 4 ||

आजन्मस्थितिनाशश्च अणिमादिविभूषितः |
अत्युन्नतधुनीज्वालामाज्ञयैवनिवर्तकः || 5 ||

अत्युल्बणमहासर्पादपिभक्तसुरक्षिता |
अतितीव्रतपस्तप्तश्चातिनम्रस्वभावकः || 6 ||

अन्नदानसदानिष्ठः अतिथिभुक्तशेषभुक् |
अदृश्यलोकसंचारी अदृष्टपूर्वदर्शिता || 7 ||

अद्वैतवस्तुतत्त्वज्ञः अद्वैतानंदवर्षकः |
अद्भुतानंतशक्तिश्च अधिष्ठानो ह्यधोक्षजः || 8 ||

अधर्मतरुच्छेता (च) अधियज्ञः स एव च |
अधिभूतोऽधिदैवश्च तथाध्यक्ष इतीरितः || 9 ||

अनघोऽनंतनामा च अनंतगुणभूषणः |
अनंतमूर्त्यनंतश्च अनंतशक्तिसंयुतः || 10 ||

अनंताश्चर्यवीर्यश्चाऽनह्लक अतिमानितः |
अनवरतसमाधिस्थः अनाथपरिरक्षकः || 11 ||

अनन्यप्रेमसंहृष्टगुरुपादविलीनहृत् |
अनाधृताष्टसिद्धिश्च अनामयपदप्रदः || 12 ||

अनादिमत्परब्रह्मा अनाहतदिवाकरः |
अनिर्देश्यवपुश्चैष अनिमेषेक्षितप्रजः || 13 ||

अनुग्रहार्थमूर्तिश्च अनुवर्तितवेंकूशः |
अनेकदिव्यमूर्तिश्च अनेकाद्भुतदर्शनः || 14 ||

अनेकजन्मजं पापं स्मृतिमात्रेण हारकः |
अनेकजन्मवृत्तांतं सविस्तारमुदीरयन् || 15 ||

अनेकजन्मसंप्राप्तकर्मबंधविदारणः |
अनेकजन्मसंसिद्धशक्तिज्ञानस्वरूपवान् || 16 ||

अंतर्बहिश्चसर्वत्रव्याप्ताखिलचराचरः |
अंतर्हृदय आकाशः अंतकालेऽपि रक्षकः || 17 ||

अंतर्याम्यंतरात्मा हि अन्नवस्त्रेप्सितप्रदः |
अपराजितशक्तिश्च अपरिग्रहभूषितः || 18 ||

अपवर्गप्रदाता च अपवर्गमयो हि सः |
अपांतरात्मरूपेण स्रष्टुरिष्टप्रवर्तकः || 19 ||

अपावृतकृपागारो अपारज्ञानशक्तिमान् |
तथाऽपार्थिवदेहस्थः अपांपुष्पनिबोधकः || 20 ||

अप्रपंचोऽप्रमत्तश्च अप्रमेयगुणाकारः |
अप्राकृतवपुश्चैव अप्राकृतपराक्रमः || 21 ||

अप्रार्थितेष्टदाता वै अब्दुल्लादि परागतिः |
अभयं सर्वभूतेभ्यो ददामीति व्रती च सः || 22 ||

अभिमानातिदूरश्च अभिषेकचमत्कृतिः |
अभीष्टवरवर्षी च अभीक्ष्णदिव्यशक्तिभृत् || 23 ||

अभेदानंदसंधाता अमर्त्योऽमृतवाक्सृतिः |
अरविंददळाक्षश्च तथाऽमितपराक्रमः || 24 ||

अरिषड्वर्गनाशी च अरिष्टघ्नोऽर्हसत्तमः |
अलभ्यलाभसंधाता अल्पदानसुतोषितः || 25 ||

अल्लानामसदावक्ता अलंबुध्या स्वलंकृतः |
अवतारितसर्वेशो अवधीरितवैभवः || 26 ||

अवलंब्यस्वपदाब्जः अवलियेतिविश्रुतः |
अवधूताखिलोपाधि अविशिष्टः स एव हि || 27 ||

अवशिष्टस्वकार्यार्थे त्यक्तदेहं प्रविष्टवान् |
अवाक्पाणिपादोरुः अवाङ्मानसगोचरः || 28 ||

अवाप्तसर्वकामोऽपि कर्मण्येव प्रतिष्टितः |
अविच्छिन्नाग्निहोत्रश्च अविच्छिन्नसुखप्रदः || 29 ||

अवेक्षितदिगंतस्थप्रजापालननिष्ठितः |
अव्याजकरुणासिंधुरव्याहतेष्टिदेशगः || 30 ||

अव्याहृतोपदेशश्च अव्याहतसुखप्रदः |
अशक्यशक्यकर्ता च अशुभाशयशुद्धिकृत् || 31 ||

अशेषभूतहृत्स्थाणुः अशोकमोहशृंखलः |
अष्टैश्वर्ययुतत्यागी अष्टसिद्धिपराङ्मुखः || 32 ||

असंयोगयुक्तात्मा असंगदृढशस्त्रभृत् |
असंख्येयावतारेषु ऋणानुबंधिरक्षितः || 33 ||

अहंब्रह्मस्थितप्रज्ञः अहंभावविवर्जितः |
अहं त्वंच त्वमेवाहमिति तत्त्वप्रबोधकः || 34 ||

अहेतुककृपासिंधुरहिंसानिरतस्तथा |
अक्षीणसौहृदोऽक्षयः तथाऽक्षयसुखप्रदः || 35 ||

अक्षरादपि कूटस्थादुत्तमपुरुषोत्तमः |
आखुवाहनमूर्तिश्च आगमाद्यंतसन्नुतः || 36 ||

आगमातीतसद्भावः आचार्यपरमस्तथा |
आत्मानुभवसंतुष्टो आत्मविद्याविशारदः || 37 ||

आत्मानंदप्रकाशश्च आत्मैव परमात्मदृक् |
आत्मैकसर्वभूतात्मा आत्मारामः स आत्मवान् || 38 ||

आदित्यमध्यवर्ती च आदिमध्यांतवर्जितः |
आनंदपरमानंदः तथाऽऽनंदप्रदो हि सः || 39 ||

आनाकमादृताज्ञश्च आनतावननिवृतिः |
आपदामपहर्ता च आपद्बांधवः एव हि || 40 ||

आफ्रिकागतवैद्याय परमानंददायकः |
आयुरारोग्यदाता च आर्तत्राणपरायणः || 41 ||

आरोपणापवादैश्च मायायोगवियोगकृत् |
आविष्कृत तिरोधत्त बहुरूपविडंबनः || 42 ||

आर्द्रचित्तेन भक्तानां सदानुग्रहवर्षकः |
आशापाशविमुक्तश्च आशापाशविमोचकः || 43 ||

इच्छाधीनजगत्सर्वः इच्छाधीनवपुस्तथा |
इष्टेप्सितार्थदाता च इच्छामोहनिवर्तकः || 44 ||

इच्छोत्थदुःखसंछेता इंद्रियारातिदर्पहा |
इंदिरारमणाह्लादिनामसाहस्रपूतहृत् || 45 ||

इंदीवरदळज्योतिर्लोचनालंकृताननः |
इंदुशीतलभाषी च इंदुवत्प्रियदर्शनः || 46 ||

इष्टापूर्तशतैर्लब्धः इष्टदैवस्वरूपधृत् |
इष्टिकादानसुप्रीतः इष्टिकालयरक्षितः || 47 ||

ईशासक्तमनोबुद्धिः ईशाराधनतत्परः |
ईशिताखिलदेवश्च ईशावास्यार्थसूचकः || 48 ||

उच्चारणाधृते भक्तहृदांत उपदेशकः |
उत्तमोत्तममार्गी च उत्तमोत्तारकर्मकृत् || 49 ||

उदासीनवदासीनः उद्धरामीत्युदीरकः |
उद्धवाय मया प्रोक्तं भागवतमिति ब्रुवन् || 50 ||

उन्मत्तश्चाभिगोप्ता च उन्मत्तवेषनामधृत् |
उपद्रवनिवारी च उपांशुजपबोधकः || 51 ||

उमेशामेशयुक्तात्मा ऊर्जितभक्तिलक्षणः |
ऊर्जितवाक्प्रदाता च ऊर्ध्वरेतस्तथैव च || 52 ||

ऊर्ध्वमूलमधःशाखामश्वत्थं भस्मसात्करः |
ऊर्ध्वगतिविधाता च ऊर्ध्वबद्धद्विकेतनः || 53 ||

ऋजुः ऋतंबरप्रज्ञः ऋणक्लिष्टधनप्रदः |
ऋणानुबद्धजंतुनां ऋणमुक्त्यै फलप्रदः || 54 ||

एकाकी चैकभक्तिश्च एकवाक्कायमानसः |
एकादश्यां स्वभक्तानां स्वतनोकृतनिष्कृतिः || 55 ||

एकाक्षरपरज्ञानी एकात्मा सर्वदेशदृक् |
एकेश्वरप्रतीतिश्च एकरीत्यादृताखिलः || 56 ||

ऐक्यानंदगतद्वंद्वः ऐक्यानंदविधायकः |
ऐक्यकृदैक्यभूतात्मा ऐहिकामुष्मिकप्रदः || 57 ||

ओंकारादर ओजस्वी औषधीकृतभस्मदः |
कथाकीर्तनपद्धत्यां नारदानुष्ठितं स्तुवन् || 58 ||

कपर्दे क्लेशनाशी च कबीर्दासावतारकः |
कपर्दे पुत्ररक्षार्थमनुभूततदामयः || 59 ||

कमलाश्लिष्टपादाब्जः कमलायतलोचनः |
कंदर्पदर्पविध्वंसी कमनीयगुणालयः || 60 ||

कर्ताऽकर्ताऽन्यथाकर्ता कर्मयुक्तोप्यकर्मकृत् |
कर्मकृत् कर्मनिर्मुक्तः कर्माऽकर्मविचक्षणः || 61 ||

कर्मबीजक्षयंकर्ता कर्मनिर्मूलनक्षमः |
कर्मव्याधिव्यपोही च कर्मबंधविनाशकः || 62 ||

कलिमलापहारी च कलौ प्रत्यक्षदैवतं |
कलियुगावतारश्च कल्युत्थभवभंजनः || 63 ||

कळ्याणानंतनामा च कळ्याणगुणभूषणः |
कविदासगणुत्राता कष्टनाशकरौषधं || 64 ||

काकादीक्षितरक्षायां धुरीणोऽहमितीरकः |
कानाभिलादपि त्राता कानने पानदानकृत् || 65 ||

कामजित् कामरूपी च कामसंकल्पवर्जितः |
कामितार्थप्रदाता च कामादिशत्रुनाशनः || 66 ||

काम्यकर्मसुसन्यस्तः कामेराशक्तिनाशकः |
कालश्च कालकालश्च कालातीतश्च कालकृत् || 67 ||

कालदर्पविनाशी च कालरातर्जनक्षमः |
कालशुनकदत्तान्नं ज्वरं हरेदिति ब्रुवन् || 68 ||

कालाग्निसदृशक्रोधः काशीरामसुरक्षकः |
कीर्तिव्याप्तदिगंतश्च कुप्रीवीतकलेबरः || 69 ||

कुंबाराग्निशिशुत्राता कुष्ठरोगनिवारकः |
कूटस्थश्च कृतज्ञश्च कृत्स्नक्षेत्रप्रकाशकः || 70 ||

कृत्स्नज्ञश्च कृपापूर्णः कृपयापालितार्भकः |
कृष्णरामशिवात्रेयमारुत्यादिस्वरूपधृत् || 71 ||

केवलात्मानुभूतिश्च कैवल्यपददायकः |
कोविदः कोमलांगश्च कोपव्याजशुभप्रदः || 72 ||

कोऽहमिति दिवानक्तं विचारमनुशासकः |
क्लिष्टरक्षाधुरीणश्च क्रोधजित् क्लेशनाशनः || 73 ||

गगनसौक्ष्म्यविस्तारः गंभीरमधुरस्वनः |
गंगातीरनिवासी च गंगोत्पत्तिपदांबुजः || 74 ||

गंगागिरिरितिख्यात यतिश्रेष्ठेन संस्तुतः |
गंधपुष्पाक्षतैः पूज्यः गतिविद्गतिसूचकः || 75 ||

गह्वरेष्ठपुराणश्च गर्वमात्सर्यवर्जितः |
गाननृत्यविनोदश्च गालवण्कर्वरप्रदः || 76 ||

गिरीशसदृशत्यागी गीताचार्यः स एव हि |
गीताद्भुतार्थवक्ता च गीतारहस्यसंप्रदः || 77 ||

गीताज्ञानमयश्चासौ गीतापूर्णोपदेशकः |
गुणातीतो गुणात्मा च गुणदोषविवर्जितः || 78 ||

गुणागुणेषु वर्तंत इत्यनासक्तिसुस्थिरः |
गुप्तो गुहाहितो गूढो गुप्तसर्वनिबोधकः || 79 ||

गुर्वंघ्रितीव्रभक्तिश्चेत्तदेवालमितीरयन् |
गुरुर्गुरुतमो गुह्यो गुरुपादपरायणः || 80 ||

गुर्वीशांघ्रिसदाध्याता गुरुसंतोषवर्धनः |
गुरुप्रेमसमालब्धपरिपूर्णस्वरूपवान् || 81 ||

गुरूपासनसंसिद्धः गुरुमार्गप्रवर्तकः |
गुर्वात्मदेवताबुद्ध्या ब्रह्मानंदमयस्तथा || 82 ||

गुरोस्समाधिपार्श्वस्थनिंबच्छायानिवासकृत् |
गुरुवेंकुशसंप्राप्तवस्त्रेष्टिका सदाधृतः || 83 ||

गुरुपरंपरादिष्टसर्वत्यागपरायणः |
गुरुपरंपराप्राप्तसच्चिदानंदमूर्तिमान् || 84 ||

गृहहीनमहाराजो गृहमेधिपराश्रयः |
गोपींस्त्राता यथा कृष्णस्तथा नाच्ने कुलावनः || 85 ||

गोपालगुंडूरायादि पुत्रपौत्रादिवर्धनः |
गोष्पदीकृतकष्टाब्धिर्गोदावरीतटागतः || 86 ||

चतुर्भुजश्चतुर्बाहुनिवारितनृसंकटः |
चमत्कारैः संक्लिष्टौर्भक्तिज्ञानविवर्धनः || 87 ||

चंदनालेपरुष्टानां दुष्टानां धर्षणक्षमः |
चंदोर्करादि भक्तानां सदापालननिष्ठितः || 88 ||

चराचरपरिव्याप्तश्चर्मदाहेप्यविक्रियः |
चांद्भायाख्य पाटेलार्थं चमत्कार सहायकृत् || 89 ||

चिंतामग्नपरित्राणे तस्य सर्वभारं वहः |
चित्रातिचित्रचारित्रश्चिन्मयानंद एव हि || 90 ||

चिरवासकृतैर्बंधैः शिर्डीग्रामं पुनर्गतः |
चोराद्याहृतवस्तूनिदत्तान्येवेतिहर्षितः || 91 ||

छिन्नसंशय एवासौ छिन्नसंसारबंधनः |
जगत्पिता जगन्माता जगत्त्राता जगद्धितः || 92 ||

जगत्स्रष्टा जगत्साक्षी जगद्व्यापी जगद्गुरुः |
जगत्प्रभुर्जगन्नाथो जगदेकदिवाकरः || 93 ||

जगन्मोहचमत्कारः जगन्नाटकसूत्रधृत् |
जगन्मंगळकर्ता च जगन्मायेतिबोधकः || 94 ||

जडोन्मत्तपिशाचाभोप्यंतःसच्चित्सुखस्थितः |
जन्मबंधविनिर्मुक्तः जन्मसाफल्यमंत्रदः || 95 ||

जन्मजन्मांतरज्ञश्च जन्मनाशरहस्यवित् |
जनजल्पमनाद्यत्य जपसिद्धिमहाद्युतिः || 96 ||

जप्तनामसुसंतुष्टहरिप्रत्यक्षभावितः |
जपप्रेरितभक्तश्च जप्यनामा जनेश्वरः || 97 ||

जलहीनस्थले खिन्नभक्तार्थं जलसृष्टिकृत् |
जवारालीति मौलानासेवनेऽक्लिष्टमानसः || 98 ||

जातग्रामाद्गुरोर्ग्रामं तस्मात्पूर्वस्थलं व्रजन् |
जातिर्भेदमतैर्भेद इति भेदतिरस्कृतः || 99 ||

जातिविद्याधनैश्चापि हीनानार्द्रहृदावनः |
जांबूनदपरित्यागी जागरूकावितप्रजः || 100 ||

जायापत्यगृहक्षेत्रस्वजनस्वार्थवर्जितः |
जितद्वैतमहामोहो जितक्रोधो जितेंद्रियः || 101 ||

जितकंदर्पदर्पश्च जितात्मा जितषड्रिपुः |
जीर्णहूणालयस्थाने पूर्वजन्मकृतं स्मरन् || 102 ||

जीर्णहूणालयं चाद्य सर्वमर्त्यालयंकरः |
जीर्णवस्त्रसमं मत्वा देहं त्यक्त्वा सुखं स्थितः || 103 ||

जीर्णवस्त्रसमं पश्यन् त्यक्त्वा देहं प्रविष्टवान् |
जीवन्मुक्तश्च जीवानां मुक्तिसद्गतिदायकः || 104 ||

ज्योतिश्शास्त्ररहस्यज्ञः ज्योतिर्ज्ञानप्रदस्तथा |
ज्योक्चसूर्यं दृशा पश्यन् ज्ञानभास्करमूर्तिमान् || 105 ||

ज्ञातसर्वरहस्यश्च ज्ञातब्रह्मपरात्परः |
ज्ञानभक्तिप्रदश्चासौ ज्ञानविज्ञाननिश्चयः || 106 ||

ज्ञानशक्तिसमारूढः ज्ञानयोगव्यवस्थितः |
ज्ञानाग्निदग्धकर्मा च ज्ञाननिर्धूतकल्मषः || 107 ||

ज्ञानवैराग्यसंधाता ज्ञानसंछिन्नसंशयः |
ज्ञानापास्तमहामोहः ज्ञानीत्यात्मैव निश्चयः || 108 ||

ज्ञानेश्वरीपठद्दैवप्रतिबंधनिवारकः |
ज्ञानं ज्ञेयं ज्ञानगम्यं ज्ञातसर्व परं मतः || 109 ||

ज्योतिषां प्रथमज्योतिर्ज्योतिर्हीनद्युतिप्रदः |
तपस्संदीप्ततेजस्वी तप्तकांचनसन्निभः || 110 ||

तत्त्वज्ञानार्थदर्शी च तत्त्वमस्यादिलक्षितः |
तत्त्ववित् तत्त्वमूर्तिश्च तंद्राऽऽलस्यविवर्जितः || 111 ||

तत्त्वमालाधरश्चैव तत्त्वसारविशारदः |
तर्जितांतकदूतश्च तमसः परः उच्यते || 112 ||

तात्यागणपतिप्रेष्ठस्तात्यानूल्कर्गतिप्रदः |
तारकब्रह्मनामा च तमोरजोविवर्जितः || 113 ||

तामरसदळाक्षश्च ताराबाय्यासुरक्षः |
तिलकपूजितांघ्रिश्च तिर्यग्जंतुगतिप्रदः || 114 ||

तीर्थकृतनिवासश्च तीर्थपाद इतीरितः |
तीव्रभक्तिनृसिंहादिभक्तालीभूर्यनुग्रहः || 115 ||

तीव्रप्रेमविरागाप्तवेंकटेशकृपानिधिः |
तुल्यप्रियाऽप्रियश्चैव तुल्यनिंदाऽऽत्मसंस्तुतिः || 116 ||

तुल्याधिकविहीनश्च तुष्टसज्जनसंवृतः |
तृप्तात्मा च तृषाहीनस्तृणीकृतजगद्वसुः || 117 ||

तैलीकृतजलापूर्णदीपसंज्वलितालयः |
त्रिकालज्ञस्त्रिमूर्तिश्च त्रिगुणातीत उच्यते || 118 ||

त्रियामायोगनिष्ठात्मा दशदिग्भक्तपालकः |
त्रिवर्गमोक्षसंधाता त्रिपुटीरहितस्थितिः || 119 ||

त्रिलोकस्वेच्छसंचारी त्रैलोक्यतिमिरापहः |
त्यक्तकर्मफलासंगस्त्यक्तभोगसदासुखी || 120 ||

त्यक्तदेहात्मबुद्धिश्च त्यक्तसर्वपरिग्रहः |
त्यक्त्वा मायामयं सर्वं स्वे महिम्नि सदास्थितः || 121 ||

दंडधृद्दंडनार्हाणां दुष्टवृत्तेर्निवर्तकः |
दंभदर्पातिदूरश्च दक्षिणामूर्तिरेव च || 122 ||

दक्षिणादानकर्तृभ्यो दशधाप्रतिदायकः |
दक्षिणाप्रार्थनाद्वारा शुभकृत्तत्त्वबोधकः || 123 ||

दयापरो दयासिंधुर्दत्तात्रेयः स एव हि |
दरिद्रोऽयं धनीवेति भेदाचारविवर्जितः || 124 ||

दहराकाशभानुश्च दग्धहस्तार्भकावनः |
दारिद्र्यदुःखभीतिघ्नो दामोदरवरप्रदः || 125 ||

दानशौंडस्तथा दांतर्दानैश्चान्यान् वशं नयन् |
दानमार्गस्खलत्पादनानाचांदोर्करावनः || 126 ||

दिव्यज्ञानप्रदश्चासौ दिव्यमंगळविग्रहः |
दीनदयापरश्चासौ दीर्घदृग्दीनवत्सलः || 127 ||

दुष्टानां दमने शक्तः दुराधर्षतपोबलः |
दुर्भिक्षोऽप्यन्नदाता च दुरादृष्टविनाशकृत् || 128 ||

दुःखशोकभयद्वेषमोहाद्यशुभनाशकः |
दुष्टनिग्रहशिष्टानुग्रहरूपमहाव्रतः || 129 ||

दुष्टमूर्खजडादीनामप्रकाशस्वरूपवते |
दुष्टजंतुपरित्राता दूरवर्तिसमस्तदृक् || 130 ||

दृश्यं नश्यं न विश्वास्यमिति बुद्धिप्रबोधकः |
दृश्यं सर्वं हि चैतन्यमित्यानंदप्रतिष्ठः || 131 ||

देहे विगलिताशश्च देहयात्रार्थमन्नभुक् |
देहो गेहस्ततो मांतु निन्ये गुरुरितीरकः || 132 ||

देहात्मबुद्धिहीनश्च देहमोहप्रभंजनः |
देहो देवालयस्तस्मिन् देवं पश्येत्युदीरयन् || 133 ||

दैवीसंपत्प्रपूर्णश्च देशोद्धारसहायकृत् |
द्वंद्वमोहविनिर्मुक्तः द्वंद्वातीतविमत्सरः || 134 ||

द्वारकामायिवासी च द्वेषद्रोहविवर्जितः |
द्वैताद्वैतविशिष्टादीन् काले स्थाने विबोधकः || 135 ||

धनहीनान् धनाढ्यां च समदृष्ट्यैव रक्षकः |
धनदेनसमत्यागी धरणीधरसन्निभः || 136 ||

धर्मज्ञो धर्मसेतुश्च धर्मस्थापनसंभवः |
धुमालेउपासनीपत्न्यो निर्वाणे सद्गतिप्रदः || 137 ||

धूपखेडा पटेल् चांद्भाय् नष्टाश्वस्थानसूचकः |
धूमयानात् पतत्पाथेवारपत्नी सुरक्षकः || 138 ||

ध्यानावस्थितचेताश्च धृत्युत्साहसमन्वितः |
नतजनावनश्चासौ नरलोकमनोरमः || 139 ||

नष्टदृष्टिप्रदाता च नरलोकविडंबनः |
नागसर्पे मयूरे च समारूढ षडाननः || 140 ||

नानाचांदोर्कमाहूया तत्सद्गत्यै कृतोद्यमः |
नाना निम्होण्करस्यांते स्वांघ्रि ध्यानलयप्रदः || 141 ||

नानादेशाभिधाकारो नानाविधिसमर्चितः |
नारायणमहाराजसंश्लाघितपदांबुजः || 142 ||

नारायणपरश्चैष तथासौ नामवर्जितः |
निगृहितेंद्रियग्रामः निगमागमगोचरः || 143 ||

नित्यसर्वगतस्थाणुर्नित्यतृप्तो निराश्रयः |
नित्यान्नदानधर्मिष्ठो नित्यानंदप्रवाहकः || 144 ||

नित्यमंगळधामा च नित्याग्निहोत्रवर्धनः |
नित्यकर्मनियोक्ता च नित्यसत्त्वस्थितस्तथा || 145 ||

निंबपादपमूलस्थः निरंतराग्निरक्षिता |
निस्पृहो निर्विकल्पश्च निरंकुशगतागतिः || 146 ||

निर्जितकामनादोषः निराशश्च निरंजनः |
निर्विकल्पसमाधिस्थो निरपेक्षश्च निर्गुणः || 147 ||

निर्द्वंद्वो नित्यसत्त्वस्थो निर्विकारश्च निश्चलः |
निरालंबो निराकारो निवृत्तगुणदोषकः || 148 ||

नूल्कर विजयानंद माहिषां गतिदायकः | [दत्त सद्गतिः]
नरसिंह गणूदास दत्त प्रचारसाधनः || 149 ||

नैष्ठिकब्रह्मचर्यश्च नैष्कर्म्यपरिनिष्ठितः |
पंडरीपांडुरंगाख्यः पाटिल् तात्याजी मातुलः || 150 ||

पतितपावनश्चासौ पत्रिग्रामसमुद्भवः |
पदविसृष्टगंगांभः पदांबुजनतावनः || 151 ||

परब्रह्मस्वरूपी च परमकरुणालयः |
परतत्त्वप्रदीपश्च परमार्थनिवेदकः || 152 ||

परमानंदनिस्यंदः परंज्योतिः परात्परः |
परमेष्ठी परंधामा परमेश्वरः ह्येव सः || 153 ||

परमसद्गुरुश्चासौ परमाचार्य उच्यते |
परधर्मभयाद्भक्तान् स्वे स्वे धर्मे नियोजकः || 154 ||

परार्थैकांतसंभूतिः परमात्मा परागतिः |
पापतापौघसंहारी पामरव्याजपंडितः || 155 ||

पापाद्दासं समाकृष्य पुण्यमार्ग प्रवर्तकः |
पिपीलिकासुखान्नदः पिशाचेश्च व्यवस्थितः || 156 ||

पुत्रकामेष्ठि यागादेः ऋते संतानवर्धनः |
पुनरुज्जीवितप्रेतः पुनरावृत्तिनाशकः || 157 ||

पुनः पुनरिहागम्य भक्तेभ्यः सद्गतिप्रदः |
पुंडरीकायताक्षश्च पुण्यश्रवणकीर्तनः || 158 ||

पुरंदरादिभक्ताग्र्यपरित्राणधुरंधरः |
पुराणपुरुषश्चासौ पुरीशः पुरुषोत्तमः || 159 ||

पूजापराङ्मुखः पूर्णः पूर्णवैराग्यशोभितः |
पूर्णानंदस्वरूपी च तथा पूर्णकृपानिधिः || 160 ||

पूर्णचंद्रसमाह्लादी पूर्णकामश्च पूर्वजः |
प्रणतपालनोद्युक्तः प्रणतार्तिहरस्तथा || 161 ||

प्रत्यक्षदेवतामूर्तिः प्रत्यगात्मनिदर्शकः |
प्रपन्नपारिजातश्च प्रपन्नानां परागतिः || 162 ||

प्रमाणातीतचिन्मूर्तिः प्रमादाभिधमृत्युजित् |
प्रसन्नवदनश्चासौ प्रसादाभिमुखद्युतिः || 163 ||

प्रशस्तवाक् प्रशांतात्मा प्रियसत्यमुदाहरन् |
प्रेमदः प्रेमवश्यश्च प्रेममार्गैकसाधनः || 164 ||

बहुरूपनिगूढात्मा बलदृप्तदमक्षमः |
बलातिदर्पभय्याजिमहागर्वविभंजनः || 165 ||

बुधसंतोषदश्चैव बुद्धः बुधजनावनः |
बृहद्बंधविमोक्ता च बृहद्धारवहक्षमः || 166 ||

ब्रह्मकुलसमुद्भूतः ब्रह्मचारिव्रतस्थितः |
ब्रह्मानंदामृतेमग्नः ब्रह्मानंदः स एव च || 167 ||

ब्रह्मानंदलसद्दृष्टिः ब्रह्मवादी बृहच्छ्रवः |
ब्राह्मणस्त्रीविसृष्टोल्कातर्जितश्वाकृतिस्तथा || 168 ||

ब्राह्मणानां मशीदिस्थः ब्रह्मण्यो ब्रह्मवित्तमः |
भक्तदासगणूप्राणमानवृत्त्यादिरक्षकः || 169 ||

भक्तात्यंतहितैषी च भक्ताश्रितदयापरः |
भक्तार्थे धृतदेहश्च भक्तार्थे दग्धहस्तकः || 170 ||

भक्तपरागतिश्चासौ भक्तवत्सल एव च |
भक्तमानसवासी च भक्तातिसुलभस्तथा || 171 ||

भक्तभवाब्धिपोतश्च भगवान् भजतां सुहृत् |
भक्तसर्वस्वहारी च भक्तानुग्रहकातरः || 172 ||

भक्तरास्न्यादि सर्वेषां अमोघाभयसंप्रदः |
भक्तावनसमर्थश्च भक्तावनधुरंधरः || 173 ||

भक्तभावपराधीनः भक्तात्यंतहितौषधं |
भक्तावनप्रतिज्ञश्च भजतामिष्टकामधुक् || 174 ||

भक्तहृत्पद्मवासी च भक्तिमार्गप्रदर्शकः |
भक्ताशयविहारी च भक्तसर्वमलापहः || 175 ||

भक्तबोधैकनिष्ठश्च भक्तानां सद्गतिप्रदः |
भद्रमार्गप्रदर्शी च भद्रं भद्रमिति ब्रुवन् || 176 ||

भद्रश्रवश्च भन्नूमायि साध्वीमहितशासनः |
भयसंत्रस्तकापर्देऽमोघाभयवरप्रदः || 177 ||

भयहीनो भयत्राता भयकृद्भयनाशनः |
भववारिधिपोतश्च भवलुंठनकोविदः || 178 ||

भस्मदाननिरस्ताधिव्याधिदुःखाऽशुभाऽखिलः |
भस्मसात्कृतभक्तारी भस्मसात्कृतमन्मथः || 179 ||

भस्मपूतमशीदिस्थः भस्मदग्धाखिलामयः |
भागोजि कुष्ठरोगघ्नः भाषाखिलसुवेदितः || 180 ||

भाष्यकृद्भावगम्यश्च भारसर्वपरिग्रहः |
भागवतसहायश्च भावनाशून्यतः सुखी || 181 ||

भागवतप्रधानश्च तथा भागवतोत्तमः |
भाटेद्वेषं समाकृष्य भक्तिं तस्मै प्रदत्तवान् || 182 ||

भिल्लरूपेण दत्तांभः भिक्षान्नदानशेषभुक् |
भिक्षाधर्ममहाराजो भिक्षौघदत्तभोजनः || 183 ||

भीमाजि क्षयपापघ्नस्तथा भीमबलान्वितः |
भीतानां भीतिनाशी च तथा भीषणभीषणः || 184 ||

भीषाचालितसुर्याग्निमघवन्मृत्युमारुतः |
भुक्तिमुक्तिप्रदाता च भुजगाद्रक्षितप्रजः || 185 ||

भुजंगरूपमाविश्य सहस्रजनपूजितः |
भुक्त्वा भोजनदातृणां दग्धप्रागुत्तराशुभः || 186 ||

भूटिद्वारा गृहं बद्ध्वा कृतसर्वमतालयः |
भूभृत्समोपकारी च भूमाऽसौ भूशयस्तथा || 187 ||

भूतशरण्यभूतश्च भूतात्मा भूतभावनः |
भूतप्रेतपिशाचादीन् धर्ममार्गे नियोजयन् || 188 ||

भृत्यस्यभृत्यसेवाकृत् भृत्यभारवहस्तथा |
भेकं दत्तवरं स्मृत्वा सर्पस्यादपि रक्षकः || 189 ||

भोगैश्वर्येष्वसक्तात्मा भैषज्येभिषजांवरः |
मर्करूपेण भक्तस्य रक्षणे तेन ताडितः || 190 ||

मंत्रघोषमशीदिस्थः मदाभिमानवर्जितः |
मधुपानभृशासक्तिं दिव्यशक्त्या व्यपोहकः || 191 ||

मशीध्यां तुलसीपूजां अग्निहोत्रं च शासकः |
महावाक्यसुधामग्नः महाभागवतस्तथा || 192 ||

महानुभावतेजस्वी महायोगेश्वरश्च सः |
महाभयपरित्राता महात्मा च महाबलः || 193 ||

माधवरायदेश्पांडे सख्युः साहाय्यकृत्तथा |
मानापमानयोस्तुल्यः मार्गबंधुश्च मारुतिः || 194 ||

मायामानुष रूपेण गूढैश्वर्यपरात्परः |
मार्गस्थदेवसत्कारः कार्य इत्यनुशासिता || 195 ||

मारीग्रस्थ बूटीत्राता मार्जालोच्छिष्ठभोजनः |
मिरीकरं सर्पगंडात् दैवाज्ञाप्ताद्विमोचयन् || 196 ||

मितवाक् मितभुक् चैव मित्रेशत्रौसदासमः |
मीनातायी प्रसूत्यर्थं प्रेषिताय रथं ददत् || 197 ||

मुक्तसंग आनंवादी मुक्तसंसृतिबंधनः |
मुहुर्देवावतारादि नामोच्चारणनिवृतः || 198 ||

मूर्तिपूजानुशास्ता च मूर्तिमानप्यमूर्तिमान् |
मूलेशास्त्री गुरोर्घोलप महाराजस्य रूपधृत् || 199 ||

मृतसूनुं समाकृष्य पूर्वमातरि योजयन् |
मृदालयनिवासी च मृत्युभीतिव्यपोहकः || 200 ||

मेघश्यामायपूजार्थं शिवलिंगमुपाहरन् |
मोहकलिलतीर्णश्च मोहसंशयनाशकः || 201 ||

मोहिनीराजपूजायां कुल्कर्ण्यप्पा नियोजकः |
मोक्षमार्गसहायश्च मौनव्याख्याप्रबोधकः || 202 ||

यज्ञदानतपोनिष्ठः यज्ञशिष्टान्नभोजनः |
यतींद्रियमनोबुद्धिः यतिधर्मसुपालकः || 203 ||

यतो वाचो निवर्तंते तदानंदसुनिष्ठितः |
यत्नातिशयसेवाप्त गुरुपूर्णकृपाबलः || 204 ||

यथेच्छसूक्ष्मसंचारी यथेष्टदानधर्मकृत् |
यंत्रारूढं जगत्सर्वं मायया भ्रामयत्प्रभुः || 205 ||

यमकिंकरसंत्रस्त सामंतस्य सहायकृत् |
यमदूतपरिक्लिष्टपुरंदरसुरक्षकः || 206 ||

यमभीतिविनाशी च यवनालयभूषणः |
यशसापिमहाराजः यशःपूरितभारतः || 207 ||

यक्षरक्षःपिशाचानां सान्निध्यादेवनाशकः |
युक्तभोजननिद्रश्च युगांतरचरित्रवित् || 208 ||

योगशक्तिजितस्वप्नः योगमायासमावृतः |
योगवीक्षणसंदत्तपरमानंदमूर्तिमान् || 209 ||

योगिभिर्ध्यानगम्यश्च योगक्षेमवहस्तथा |
रथस्य रजताश्वेषु हृतेष्वम्लानमानसः || 210 ||

रसश्च रससारज्ञः रसनारसजिच्च सः |
रसोऽप्यस्य परं दृष्ट्वा निवर्तितमहायशः || 211 ||

रक्षणात्पोषणात्सर्वपितृमातृगुरुप्रभुः |
रागद्वेषवियुक्तात्मा राकाचंद्रसमाननः || 212 ||

राजीवलोचनश्चैषः राजभिश्चाभिवंदितः |
रामभक्तिप्रपूर्णश्च रामरूपप्रदर्शकः || 213 ||

रामसारूप्यलब्धश्च रामसायीति विश्रुतः |
रामदूतमयश्चासौ राममंत्रोपदेशकः || 214 ||

राममूर्त्यादिशंकर्ता रासनेकुलवर्धनः |
रुद्रतुल्यप्रकोपश्च रुद्रकोपदमक्षमः || 215 ||

रुद्रविष्णुकृताभेदः रूपिणीरूप्यमोहजित् |
रूपे रूपे चिदात्मानं पश्यध्वमिति बोधकः || 216 ||

रूपाद्रूपांतरं यातोऽमृत इत्यभयप्रदः |
रेगे शिशोः तथांधस्य सतांगति विधायकः || 217 ||

रोगदारिद्र्यदुःखादीन् भस्मदानेन वारयन् |
रोदनातार्द्रचित्तश्च रोमहर्षादवाकृतिः || 218 ||

लघ्वाशी लघुनिद्रश्च लब्धाश्वग्रामणिस्तुतः |
लगुडोद्धृतरोहिल्लास्तंभनाद्दर्पनाशकः || 219 ||

ललिताद्भुतचारित्रः लक्ष्मीनारायणस्तथा |
लीलामानुषदेहस्थो लीलामानुषकर्मकृत् || 220 ||

लेलेशास्त्रि श्रुतिप्रीत्या मशीदि वेदघोषणः |
लोकाभिरामो लोकेशो लोलुपत्वविवर्जितः || 221 ||

लोकेषु विहरंश्चापि सच्चिदानंदसंस्थितः |
लोणिवाण्यगणूदासं महापायाद्विमोचकः || 222 ||

वस्त्रवद्वपुरुद्वीक्ष्य स्वेच्छत्यक्तकलेबरः |
वस्त्रवद्देहमुत्सृज्य पुनर्देहं प्रविष्टवान् || 223 ||

वंध्यादोषविमुक्त्यर्थं तद्वस्त्रे नारिकेलदः |
वासुदेवैकसंतुष्टिः वादद्वेषमदाऽप्रियः || 224 ||

विद्याविनयसंपन्नो विधेयात्मा च वीर्यवान् |
विविक्तदेशसेवी च विश्वभावनभावितः || 225 ||

विश्वमंगळमांगळ्यो विषयात् संहृतेंद्रियः |
वीतरागभयक्रोधः वृद्धांधेक्षणसंप्रदः || 226 ||

वेदांतांबुजसूर्यश्च वेदिस्थाग्निविवर्धनः |
वैराग्यपूर्णचारित्रः वैकुंठप्रियकर्मकृत् || 227 ||

वैहायसगतिश्चासौ व्यामोहप्रशमौषधं |
शत्रुच्छेदैकमंत्रं स शरणागतवत्सलः || 228 ||

शरणागतभीमाजीश्वांधभेकादिरक्षकः |
शरीरस्थाऽशरीरस्थः शरीरानेकसंभृतः || 229 ||

शश्वत्परार्थसर्वेहः शरीरकर्मकेवलः |
शाश्वतधर्मगोप्ता च शांतिदांतिविभूषितः || 230 ||

शिरस्तंभितगंगांभः शांताकारः स एव च |
शिष्टधर्ममनुप्राप्य मौलाना पादसेवितः || 231 ||

शिवदः शिवरूपश्च शिवशक्तियुतस्तथा |
शिरीयानसुतोद्वाहं यथोक्तं परिपूरयन् || 232 ||

शीतोष्णसुखदुःखेषु समः शीतलवाक्सुधः |
शिर्डिन्यस्तगुरोर्देहः शिर्डित्यक्तकलेबरः || 233 ||

शुक्लांबरधरश्चैव शुद्धसत्त्वगुणस्थितः |
शुद्धज्ञानस्वरूपश्च शुभाऽशुभविवर्जितः || 234 ||

शुभ्रमार्गेण नेता नृन् तद्विष्णोः परमं पदं |
शेलुगुरुकुलेवासी शेषशायी तथैव च || 235 ||

श्रीकंठः श्रीकरः श्रीमान् श्रेष्ठः श्रेयोविधायकः |
श्रुतिस्मृतिशिरोरत्नविभूषितपदांबुजः || 236 ||

श्रेयान् स्वधर्म इत्युक्त्वा स्वेस्वेधर्मनियोजकः |
सखारामसशिष्यश्च सकलाश्रयकामदुक् || 237 ||

सगुणोनिर्गुणश्चैव सच्चिदानंदमूर्तिमान् |
सज्जनमानसव्योमराजमानसुधाकरः || 238 ||

सत्कर्मनिरतश्चासौ सत्संतानवरप्रदः |
सत्यव्रतश्च सत्यं च सत्सुलभोऽन्यदुर्लभः || 239 ||

सत्यवाक् सत्यसंकल्पः सत्यधर्मपरायणः |
सत्यपराक्रमश्चासौ सत्यद्रष्टा सनातनः || 240 ||

सत्यनारायणश्चासौ सत्यतत्त्वप्रबोधकः |
सत्पुरुषः सदाचारः सदापरहितेरतः || 241 ||

सदाक्षिप्तनिजानंदः सदानंदश्च सद्गुरुः |
सदाजनहितोद्युक्तः सदात्मा च सदाशिवः || 242 ||

सदार्द्रचित्तः सद्रूपी सदाश्रयः सदाजितः |
सन्यासयोगयुक्तात्मा सन्मार्गस्थापनव्रतः || 243 ||

सबीजं फलमादाय निर्बीजं परिणामकः |
समदुःखसुखस्वस्थः समलोष्टाश्मकांचनः || 244 ||

समर्थसद्गुरुश्रेष्ठः समानरहितश्च सः |
समाश्रितजनत्राणव्रतपालनतत्परः || 245 ||

समुद्रसमगांभीर्यः संकल्परहितश्च सः |
संसारतापहार्यंघ्रिः तथा संसारवर्जितः || 246 ||

संसारोत्तारनामा च सरोजदळकोमलः |
सर्पादिभयहारी च सर्परूपेऽप्यवस्थितः || 247 ||

सर्वकर्मफलत्यागी सर्वत्रसमवस्थितः |
सर्वतःपाणिपादश्च सर्वतोऽक्षिशिरोमुखः || 248 ||

सर्वतःश्रुतिमन्मूर्तिः सर्वमावृत्यसंस्थितः |
सर्वधर्मसमत्राता सर्वधर्मसुपूजितः || 249 ||

सर्वधर्मान् परित्यज्य गुर्वीशं शरणं गतः |
सर्वधीसाक्षिभूतश्च सर्वनामाभिसूचितः || 250 ||

सर्वभूतांतरात्मा च सर्वभूताशयस्थितः |
सर्वभूतादिवासश्च सर्वभूतहितेरतः || 251 ||

सर्वभूतात्मभूतात्मा सर्वभूतसुहृच्च सः |
सर्वभूतनिशोन्निद्रः सर्वभूतसमादृतः || 252 ||

सर्वज्ञः सर्ववित् सर्वः सर्वमतसुसम्मतः |
सर्वब्रह्ममयं द्रष्टा सर्वशक्त्युपबृंहितः || 253 ||

सर्वसंकल्पसन्यासी तथा सर्वसंगविवर्जितः |
सर्वलोकशरण्यश्च सर्वलोकमहेश्वरः || 254 ||

सर्वेशः सर्वरूपी च सर्वशत्रुनिबर्हणः |
सर्वैश्वर्यैकमंत्रं च सर्वेप्सितफलप्रदः || 255 ||

सर्वोपकारकारी च सर्वोपास्यपदांबुजः |
सहस्रशिर्षमूर्तिश्च सहस्राक्षः सहस्रपात् || 256 ||

सहस्रनामसुश्लाघी सहस्रनामलक्षितः |
साकारोऽपि निराकारः साकारार्चासुमानितः || 257 ||

(*- साधुजनपरित्राता साधुपोषकस्तथैव च | -*)

सायीति सज्जानैः प्रोक्तः सायीदेवः स एव हि |
सायीरां सायिनाथश्च सायीशः सायिसत्तमः || 258 ||

सालोक्यसार्ष्टिसामीप्यसायुज्यपददायकः |
साक्षात्कृतहरिप्रीत्या सर्वशक्तियुतश्च सः || 259 ||

साक्षात्कारप्रदाता च साक्षान्मन्मथमर्दनः |
सिद्धेशः सिद्धसंकल्पः सिद्धिदः सिद्धवाङ्मुखः || 260 ||

सुकृतदुष्कृतातीतः सुखेषुविगतस्पृहः |
सुखदुःखसमश्चैव सुधास्यंदिमुखोज्वलः || 261 ||

स्वेच्छामात्रजडद्देहः स्वेच्छोपात्ततनुस्तथा |
स्वीकृतभक्तरोगश्च स्वेमहिम्निप्रतिष्ठितः || 262 ||

हरिसाठे तथा नानां कामादेः परिरक्षकः |
हर्षामर्षभयोद्वेगैर्निर्मुक्तविमलाशयः || 263 ||

हिंदुमुस्लिंसमूहानां मैत्रीकरणतत्परः |
हूंकारेणैव सुक्षिप्रं स्तब्धप्रचंडमारुतः || 264 ||

हृदयग्रंथिभेदी च हृदयग्रंथिवर्जितः |
क्षांतानंतदौर्जन्यः क्षितिपालादिसेवितः |
क्षिप्रप्रसाददाता च क्षेत्रीकृतस्वशिर्डिकः || 265 ||

इति श्री सायि सहस्रनाम स्तोत्रं ||